शिवमहिम्नः स्तोत्रम्

Shiva Mahimna Stotram

Source: Wikimedia Commons — Brihat Stotra Ratnakara (1912), DjVu scan; Shiva Mahimna Stotram on printed pages 98–104. Also compared: Internet Archive — Brihat Stotra Ratnakara (1912); Internet Archive — Brihat Stotra Ratnakar, Part I, Khemraj, 1906 (CC0 scan; second witness, pages 46–54).

महिम्न स्तुति (श्लोक 1–32)

SHLOKA 1

पुष्पदन्त उवाच

महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे हर निरपवादः परिकरः॥

Mahimnaḥ Pāraṃ Te Paramaviduṣo Yadyasadṛśī Stutirbrahmādīnāmapi Tadavasannāstvayi Giraḥ |
Athāvācyaḥ Sarvaḥ Svamatipariṇāmāvadhi Gṛṇan Mamāpyeṣa Stotre Hara Nirapavādaḥ Parikaraḥ ||

SHLOKA 2

अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः॥

Atītaḥ Panthānaṃ Tava Ca Mahimā Vāṅmanasayoratadvyāvṛttyā Yaṃ Cakitamabhidhatte Śrutirapi |
Sa Kasya Stotavyaḥ Katividhaguṇaḥ Kasya Viṣayaḥ Pade Tvarvācīne Patati Na Manaḥ Kasya Na Vacaḥ ||

SHLOKA 3

मधुस्फीता वाचः परममृतं निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता॥

Madhusphītā Vācaḥ Paramamamṛtaṃ Nirmitavatastava Brahmankiṃ Vāgapi Suragurorvismayapadam |
Mama Tvetāṃ Vāṇīṃ Guṇakathanapuṇyena Bhavataḥ Punāmītyarthe'smin Puramathana Buddhirvyavasitā ||

SHLOKA 4

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु।
अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥

Tavaiśvaryaṃ Yattajjagadudayarakṣāpralayakṛttrayīvastu Vyastaṃ Tisṛṣu Guṇabhinnāsu Tanuṣu |
Abhavyānāmasminvarada Ramaṇīyāmaramaṇīṃ Vihantuṃ Vyākrośīṃ Vidadhata Ihaike Jaḍadhiyaḥ ||

SHLOKA 5

किमीहः किङ्कायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः॥

Kimīhaḥ Kiṅkāyaḥ Sa Khalu Kimupāyastribhuvanaṃ Kimādhāro Dhātā Sṛjati Kimupādāna Iti Ca |
Atarkyaiśvarye Tvayyanavasaraduḥstho Hatadhiyaḥ Kutarko'yaṃ Kāṃścinmukharayati Mohāya Jagataḥ ||

SHLOKA 6

अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे॥

Ajanmāno Lokāḥ Kimavayavavanto'pi Jagatāmadhiṣṭhātāraṃ Kiṃ Bhavavidhiranādṛtya Bhavati |
Anīśo Vā Kuryādbhuvanajanane Kaḥ Parikaro Yato Mandāstvāṃ Pratyamaravara Saṃśerata Ime ||

SHLOKA 7

त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥

Trayī Sāṅkhyaṃ Yogaḥ Paśupatimataṃ Vaiṣṇavamiti Prabhinne Prasthāne Paramidamadaḥ Pathyamiti Ca |
Rucīnāṃ Vaicitryādṛjukuṭilanānāpathajuṣāṃ Nṛṇāmeko Gamyastvamasi Payasāmarṇava Iva ||

SHLOKA 8

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति॥

Mahokṣaḥ Khaṭvāṅgaṃ Paraśurajinaṃ Bhasma Phaṇinaḥ Kapālaṃ Cetīyattava Varada Tantropakaraṇam |
Surāstāṃ Tāmṛddhiṃ Dadhati Tu Bhavadbhrūpraṇihitāṃ Nahi Svātmārāmaṃ Viṣayamṛgatṛṣṇā Bhramayati ||

SHLOKA 9

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता॥

Dhruvaṃ Kaścitsarvaṃ Sakalamaparastvadhruvamidaṃ Paro Dhrauvyādhrauvye Jagati Gadati Vyastaviṣaye |
Samaste'pyetasminpuramathana Tairvismita Iva Stuvañjihremi Tvāṃ Na Khalu Nanu Dhṛṣṭā Mukharatā ||

SHLOKA 10

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत् स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥

Tavaiśvaryaṃ Yatnādyadupari Viriñco Hariradhaḥ Paricchettuṃ Yātāvanalamanalaskandhavapuṣaḥ |
Tato Bhaktiśraddhābharagurugṛṇadbhyāṃ Giriśa Yat Svayaṃ Tasthe Tābhyāṃ Tava Kimanuvṛttirna Phalati ||

SHLOKA 11

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।
शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम्॥

Ayatnādāpādya Tribhuvanamavairavyatikaraṃ Daśāsyo Yadbāhūnabhṛta Raṇakaṇḍūparavaśān |
Śiraḥpadmaśreṇīracitacaraṇāmbhoruhabaleḥ Sthirāyāstvadbhaktestripurahara Visphūrjitamidam ||

SHLOKA 12

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः॥

Amuṣya Tvatsevāsamadhigatasāraṃ Bhujavanaṃ Balātkailāse'pi Tvadadhivasatau Vikramayataḥ |
Alabhyā Pātāle'pyalasacalitāṅguṣṭhaśirasi Pratiṣṭhā Tvayyāsīddhruvamupacito Muhyati Khalaḥ ||

SHLOKA 13

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः॥

Yadṛddhiṃ Sutrāmṇo Varada Paramoccairapi Satīmadhaścakre Bāṇaḥ Parijanavidheyatribhuvanaḥ |
Na Taccitraṃ Tasminvarivasitari Tvaccaraṇayorna Kasyā Unnatyai Bhavati Śirasastvayyavanatiḥ ||

SHLOKA 14

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयन विषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥

Akāṇḍabrahmāṇḍakṣayacakitadevāsurakṛpāvidheyasyā''sīdyastrinayana Viṣaṃ Saṃhṛtavataḥ |
Sa Kalmāṣaḥ Kaṇṭhe Tava Na Kurute Na Śriyamaho Vikāro'pi Ślāghyo Bhuvanabhayabhaṅgavyasaninaḥ ||

SHLOKA 15

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः॥

Asiddhārthā Naiva Kvacidapi Sadevāsuranare Nivartante Nityaṃ Jagati Jayino Yasya Viśikhāḥ |
Sa Paśyannīśa Tvāmitarasurasādhāraṇamabhūt Smaraḥ Smartavyātmā Na Hi Vaśiṣu Pathyaḥ Paribhavaḥ ||

SHLOKA 16

मही पादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥

Mahī Pādāghātādvrajati Sahasā Saṃśayapadaṃ Padaṃ Viṣṇorbhrāmyadbhujaparigharugṇagrahagaṇam |
Muhurdyaurdausthyaṃ Yātyanibhṛtajaṭātāḍitataṭā Jagadrakṣāyai Tvaṃ Naṭasi Nanu Vāmaiva Vibhutā ||

SHLOKA 17

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥

Viyadvyāpī Tārāgaṇaguṇitaphenodgamarucih Pravāho Vārāṃ Yaḥ Pṛṣatalaghudṛṣṭaḥ Śirasi Te |
Jagaddvīpākāraṃ Jaladhivalayaṃ Tena Kṛtamityanenaivonneyaṃ Dhṛtamahima Divyaṃ Tava Vapuḥ ||

SHLOKA 18

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥

Rathaḥ Kṣoṇī Yantā Śatadhṛtiragendro Dhanuratho Rathāṅge Candrārkau Rathacaraṇapāṇiḥ Śara Iti |
Didhakṣoste Ko'yaṃ Tripuratṛṇamāḍambaravidhirvidheyaiḥ Krīḍantyo Na Khalu Paratantrāḥ Prabhudhiyaḥ ||

SHLOKA 19

हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम्॥

Hariste Sāhasraṃ Kamalabalimādhāya Padayoryadekone Tasminnijamudaharannetrakamalam |
Gato Bhaktyudrekaḥ Pariṇatimasau Cakravapuṣā Trayāṇāṃ Rakṣāyai Tripurahara Jāgarti Jagatām ||

SHLOKA 20

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः॥

Kratau Supte Jāgrattvamasi Phalayoge Kratumatāṃ Kva Karma Pradhvastaṃ Phalati Puruṣārādhanamṛte |
Atastvāṃ Samprekṣya Kratuṣu Phaladānapratibhuvaṃ Śrutau Śraddhāṃ Badhvā Dṛḍhaparikaraḥ Karmasu Janaḥ ||

SHLOKA 21

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः।
क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः॥

Kriyādakṣo Dakṣaḥ Kratupatiradhīśastanubhṛtāmṛṣīṇāmārtvijyaṃ Śaraṇada Sadasyāḥ Suragaṇāḥ |
Kratubhreṣastvattaḥ Kratuphalavidhānavyasanino Dhruvaṃ Kartuḥ Śraddhāvidhuramabhicārāya Hi Makhāḥ ||

SHLOKA 22

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः॥

Prajānāthaṃ Nātha Prasabhamabhikaṃ Svāṃ Duhitaraṃ Gataṃ Rohidbhūtāṃ Riramayiṣumṛṣyasya Vapuṣā |
Dhanuṣpāṇeryātaṃ Divamapi Sapatrākṛtamamuṃ Trasantaṃ Te'dyāpi Tyajati Na Mṛgavyādharabhasaḥ ||

SHLOKA 23

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः॥

Svalāvaṇyāśaṃsā Dhṛtadhanuṣamahnāya Tṛṇavatpuraḥ Pluṣṭaṃ Dṛṣṭvā Puramathana Puṣpāyudhamapi |
Yadi Straiṇaṃ Devī Yamaniratadehārdhaghaṭanādavaiti Tvāmaddhā Bata Varada Mugdhā Yuvatayaḥ ||

SHLOKA 24

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथाऽपि स्मर्तॄणां वरद परमं मङ्गलमसि॥

Śmaśāneṣvākrīḍā Smarahara Piśācāḥ Sahacarāścitābhasmālepaḥ Sragapi Nṛkaroṭīparikaraḥ |
Amaṅgalyaṃ Śīlaṃ Tava Bhavatu Nāmaivamakhilaṃ Tathā'pi Smartṛṇāṃ Varada Paramaṃ Maṅgalamasi ||

SHLOKA 25

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥

Manaḥ Pratyakcitte Savidhamavadhāyāttamarutaḥ Prahṛṣyadromāṇaḥ Pramadasalilotsaṅgitadṛśaḥ |
Yadālokyāhlādaṃ Hrada Iva Nimajjyāmṛtamaye Dadhatyantastattvaṃ Kimapi Yaminastatkila Bhavān ||

SHLOKA 26

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि॥

Tvamarkastvaṃ Somastvamasi Pavanastvaṃ Hutavahastvamāpastvaṃ Vyoma Tvamu Dharaṇirātmā Tvamiti Ca |
Paricchinnāmevaṃ Tvayi Pariṇatā Bibhrati Giraṃ Na Vidmastattattvaṃ Vayamiha Tu Yattvaṃ Na Bhavasi ||

SHLOKA 27

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम्॥

Trayīṃ Tisro Vṛttīstribhuvanamatho Trīnapi Surānakārādyairvarṇaistribhirabhidadhattīrṇavikṛti |
Turīyaṃ Te Dhāma Dhvanibhiravarundhānamaṇubhiḥ Samastavyastaṃ Tvāṃ Śaraṇada Gṛṇātyomiti Padam ||

SHLOKA 28

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महांस्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रविहितनमस्योऽस्मि भवते॥

Bhavaḥ Śarvo Rudraḥ Paśupatirathograḥ Saha Mahāṃstathā Bhīmeśānāviti Yadabhidhānāṣṭakamidam |
Amuṣminpratyekaṃ Pravicarati Deva Śrutirapi Priyāyāsmai Dhāmne Pravihitanamasyo'smi Bhavate ||

SHLOKA 29

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमितिशर्वाय च नमः॥

Namo Nediṣṭhāya Priyadava Daviṣṭhāya Ca Namo Namaḥ Kṣodiṣṭhāya Smarahara Mahiṣṭhāya Ca Namaḥ |
Namo Varṣiṣṭhāya Trinayana Yaviṣṭhāya Ca Namo Namaḥ Sarvasmai Te Tadidamitiśarvāya Ca Namaḥ ||

SHLOKA 30

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥

Bahalarajase Viśvotpattau Bhavāya Namo Namaḥ Prabalatamase Tatsaṃhāre Harāya Namo Namaḥ |
Janasukhakṛte Sattvodriktau Mṛḍāya Namo Namaḥ Pramahasi Pade Nistraiguṇye Śivāya Namo Namaḥ ||

SHLOKA 31

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥

Kṛśapariṇati Cetaḥ Kleśavaśyaṃ Kva Cedaṃ Kva Ca Tava Guṇasīmollaṅghinī Śaśvadṛddhiḥ |
Iti Cakitamamandīkṛtya Māṃ Bhaktirādhādvarada Caraṇayoste Vākyapuṣpopahāram ||

SHLOKA 32

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति॥

Asitagirisamaṃ Syātkajjalaṃ Sindhupātre Surataruvaraśākhā Lekhanī Patramurvī |
Likhati Yadi Gṛhītvā Śāradā Sarvakālaṃ Tadapi Tava Guṇānāmīśa Pāraṃ Na Yāti ||

रचना-परिचय, फलश्रुति और समापन

SHLOKA 33

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार॥

Asurasuramunīndrairarcitasyendumaulergrathitaguṇamahimno Nirguṇasyeśvarasya |
Sakalagaṇavariṣṭhaḥ Puṣpadantābhidhāno Ruciramalaghuvṛttaiḥ Stotrametaccakāra ||

SHLOKA 34

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च॥

Aharaharanavadyaṃ Dhūrjaṭeḥ Stotrametatpaṭhati Paramabhaktyā Śuddhacittaḥ Pumānyaḥ |
Sa Bhavati Śivaloke Rudratulyastathā'tra Pracurataradhanāyuḥputravānkīrtimāṃśca ||

SHLOKA 35

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम्॥

Maheśānnāparo Devo Mahimno Nāparā Stutiḥ |
Aghorānnāparo Mantro Nāsti Tattvaṃ Guroḥ Param ||

SHLOKA 36

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम्॥

Dīkṣā Dānaṃ Tapastīrthaṃ Jñānaṃ Yāgādikāḥ Kriyāḥ |
Mahimnastavapāṭhasya Kalāṃ Nārhanti Ṣoḍaśīm ||

SHLOKA 37

कुसुमदशननामा सर्वगन्धर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः।
सगुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः॥

Kusumadaśananāmā Sarvagandharvarājaḥ Śaśidharavaramaulerdevadevasya Dāsaḥ |
Sagurunijamahimno Bhraṣṭa Evāsya Roṣātstavanamidamakārṣīddivyadivyaṃ Mahimnaḥ ||

SHLOKA 38

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम्॥

Suravaramunipūjyaṃ Svargamokṣaikahetuṃ Paṭhati Yadi Manuṣyaḥ Prāñjalirnānyacetāḥ |
Vrajati Śivasamīpaṃ Kinnaraiḥ Stūyamānaḥ Stavanamidamamoghaṃ Puṣpadantapraṇītam ||

SHLOKA 39

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः॥

Śrīpuṣpadantamukhapaṅkajanirgatena Stotreṇa Kilbiṣahareṇa Harapriyeṇa |
Kaṇṭhasthitena Paṭhitena Samāhitena Suprīṇito Bhavati Bhūtapatirmaheśaḥ ||

SHLOKA 40

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः॥

Ityeṣā Vāṅmayī Pūjā Śrīmacchaṅkarapādayoḥ |
Arpitā Tena Deveśaḥ Prīyatāṃ Me Sadāśivaḥ ||

COLOPHON

इति श्रीपुष्पदन्तविरचितं शिवमहिम्नः स्तोत्रं सम्पूर्णम्॥

Iti Śrīpuṣpadantaviracitaṃ Śivamahimnaḥ Stotraṃ Sampūrṇam ||